# Mahamayadevisvarupadhyanam

# મહામાયાદેવીસ્વરૂપધ્યાનમ્

## Document Information

Text title : Mahamaya devi svarupadhyanam

File name : mahAmAyAdevIsvarUpadhyAnaM.itx

Category : devii, dhyAnam

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 53 shloka 24-34

Latest update : January 15, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# મહામાયાદેવીસ્વરૂપધ્યાનમ્

શોણપદ્મપ્રતીકાશાં મુક્તમૂર્ધજલમ્બિનીમ્ ॥ ૨૪॥

ચલત્કાઞ્ચનામારુહ્ય કુણ્ડલોજ્જ્વલશાલિનીમ્ ।
સુવર્ણરત્નસમ્પન્નકિરીટદ્વયધારિણીમ્ ॥ ૨૫॥

શુક્લકૃષ્ણારુણૈર્નેત્રૈસ્ત્રિભિશ્ચારુવિભૂષિતામ્ ।
સન્ધ્યાચન્દ્રસમપ્રખ્યકપોલાં લોલલોચનામ્ ॥ ૨૬॥

વિપક્વદાડિમીબીજદન્તાન્ સુભ્રૂયુગોજ્જ્વલામ્ ।
બન્ધૂકદન્તવસનાં શિરીષપ્રભનાસિકામ્ ॥ ૨૭॥

કમ્બુગ્રીવાં વિશાલાક્ષીં સૂર્યકોટિસમપ્રભામ્ ।
ચતુર્ભુજાં વિવસનાં પીનોન્નતપયોધરામ્ ॥ ૨૮॥

દક્ષિણોર્ધ્વેન નિસ્ત્રિંશત્પરેણ સિદ્ધસૂત્રકમ્ ।
બિભ્રતીં વામહસ્તાભ્યામભીતિં વરદાયિનીમ્ ॥ ૨૯॥

નિમ્નનાભિક્રમાયાતાં ક્ષીણમધ્યાં મનોહરામ્ ।
આનમન્નાગપાશોરૂં ગુપ્તગુલ્ફાં સુપાર્ષ્ણિકામ્ ॥ ૩૦॥

બદ્ધપર્યઙ્કસઙ્કલ્પાં નીવારાસનરાજિતામ્ ।
ગાત્રેણ રત્નસંસ્તમ્ભં સમ્યગાલમ્બ્ય સંસ્થિતામ્ ॥ ૩૧॥

કિમિચ્છસીતિ વચનં વ્યાહરન્તીં મુહુર્મુહુઃ ।
પઞ્ચાનનં પુરઃસંસ્થં નિરીક્ષન્તીં સુવાહનમ્ ॥ ૩૨॥

મુક્તાવલીસ્વર્ણરત્નહારકેયૂરકઙ્કણાદિભિઃ ।
સર્વૈરલઙ્કારગણૈરુજ્જ્વલાં સસ્મિતાનનામ્ ॥ ૩૩॥

સૂર્યકોટિપ્રતીકાશાં સર્વલક્ષણસંયુતામ્ ।
નવયૌવનસમ્પન્નાં તથા સર્વાઙ્ગસુન્દરીમ્ ॥ ૩૪॥

ઇતિ કાલિકાપુરાણે ત્રિપઞ્ચાશત્તમાધ્યાયાન્તર્ગતં

મહામાયાદેવિસ્વરૂપધ્યાનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Mahamayadevisvarupadhyanam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*